पुरुषः ।) वनकुसुम्भः । तत्पर्य्यायः । कौसुम्भः २ अग्निसम्भवः ३ । अस्य गुणाः पाके कटुत्वं । श्लेष्मनाशित्वं । अग्निवृद्धिकारित्वञ्च । इति राजनिर्घण्टः ॥

अरण्यघोली, स्त्री, (अरण्यजा घोली, कर्म्मधारयः ।) वनघोली । पत्रशाकविशेषः । इति राजनिर्घण्टः ॥

अरण्यचटकः, पुं, (अरण्यस्य चटकः, षष्ठीतत्पुरुषः ।) वनचटकः । तत्पर्य्यायः । धूसरः २ भूमिशयः ३ । अस्य गुणाः । शीतत्वं । लघुत्वं । शुक्रवृद्धिकारित्वं । बलप्रदत्वञ्च । इति राजनिर्घण्टः ॥ (अस्य मांसगुणा यथा राजनिर्घण्टे,—
"चटकाख्यं तु शीतं लघु वृष्यं बलप्रदं ।
तद्वदारण्यचटकं तत्पूर्व्वं लघुपथ्यदम्" ॥)

अरण्यजार्द्रका, स्त्री, (अरण्ये जायते या, अरण्य + जन् + ड, अरण्यजा आर्द्रका, कर्म्मधारयः ।) वनार्द्रका । इति राजनिर्घण्टः ॥ वन आदा इति भाषा । अस्य गुणपर्य्यायौ ऐन्द्रशब्दे द्रष्टव्यौ ॥

अरण्यजीरः, पुं, (अरण्यस्य जीरः, षष्ठीतत्पुरुषः ।) वनजीरः । इति राजनिर्घण्टः ॥ वनजीरा इति भाषा ।

अरण्यधान्यं, क्ली, (अरण्यस्य धान्यं, षष्ठीतत्पुरुषः ।) नीवारः । इति राजनिर्घण्टः ॥ उड़ी धान इति भाषा ।

अरण्यमक्षिका, स्त्री, (अरण्यस्य मक्षिका, षष्ठीतत्पुरुषः ।) दंशः । इति शब्दरत्नावली ॥ डाँश इति भाषा ।

अरण्यमुद्गः, पुं, (अरण्यस्य मुद्गः, षष्ठीतत्पुरुषः ।) मकुष्ठकः । इति राजनिर्घण्टः ॥ वनमुग इति भाषा । (अस्य गुणाः मुकुष्ठकशब्दे द्रष्टव्याः ।)

अरण्यवायसः, पुं, (अरण्यस्य वायसः, षष्ठीतत्पुरुषः ।) द्रोणकाकः । इति राजनिर्घण्टः ॥ दाँड़ काक इति भाषा ।

अरण्यवासिनी, स्त्री, (अरण्ये वसति या, अरण्य + वस् + णिनि, स्त्रियां ङीप् ।) अत्यम्लपर्णी लता । इति राजनिर्घण्टः ॥

अरण्यवास्तूकः, पुं, (अरण्यस्य वास्तूकः, षष्ठीतत्पुरुषः ।) वनवास्तूकः । इति राजनिर्घण्टः ॥ वन वेतो इति भाषा । अस्य गुणपर्य्यायौ कुणञ्जरशब्दे द्रष्टव्यौ ॥

अरण्यशालिः, पुं, (अरण्यभवः शालिः, कर्म्मधारयः मध्यपदलोपश्च ।) नीवारः । वनधान्यं । इति राजनिर्घण्टः ॥

अरण्यसूरणः, पुं, (अरण्यजातः सूरणः, कर्म्मधारयः ।) वनसूरणः । इति राजनिर्घण्टः ॥ वनओल इति भाषा ।

अरण्यश्वा, [न्] पुं, (अरण्ये श्वेव हिंस्रः ।) वृकः । इति हेमचन्द्रः ॥ नेकड़े वाघ इति भाषा ।

अरण्यषष्ठी, स्त्री, (अरण्याय गन्तुं षष्ठी, चतुर्थीतत्पुरुषः ।) ज्यैष्ठशुक्लषष्ठी । वाँटाषष्ठी इति भाषा । यथा राजमार्त्तण्डे,—
"ज्यैष्ठे मासि सिते पक्षे षष्ठी चारण्यसंज्ञिता ।
व्यजनैककरास्तस्यामटन्ति विपिने स्त्रियः ॥
तां विन्ध्यवासिनीं स्कन्दषष्ठीमाराधयन्ति च ।
कन्दमूलफलाहारा लभन्ते सन्ततिं शुभां" ॥
कन्दं सूरणादि । मूलं तदितरत् । इति तिथ्यादितत्त्वं ॥

अरण्यानी, स्त्री, (अरण्य + आनुक् + स्त्रियां ङीष् । महत् अरण्यम् इत्यस्मिन् अर्थे इन्द्रवरुणेति सूत्रस्थेन हिमारण्ययोर्महत्त्वइति वार्त्तिकेन अरण्यशब्दस्य आनुगागमः, ततो ङीष् ।) महावनं । इत्यमरः ॥ ("अस्ति मगधदेशे चम्पकवती नामारण्यानी" । इति हितोपदेशे ।)

अरतत्रपः, पुं, स्त्री, (अरता विरता त्रपा यस्य ।) कुक्कुरः । इति त्रिकाण्डशेषः ॥ रतलज्जे त्रि ॥ (नास्ति रते शृङ्गारे त्रपा लज्जा यस्य सः ।)

अरतिः, पुं, (ऋ + अति ।) क्रोधः । इत्युणादिकोषः ॥

अरतिः, स्त्री, (रम् + क्तिन्, नञ्समासः ।) अनवस्थितचित्तत्वं । इति रक्षितः ॥ क्रीड़ाभावः । इति कार्त्तिकः ॥ रतिविरहः । रतिशून्ये त्रि ॥ (विरक्तिः । प्रीतिविरहः । अनुरागराहित्यं । उत्साहहीनता । उद्यमाभावः । उद्योगराहित्यं । निश्चेष्टता । सुखाभावः । दुःखं । क्लेशः । औत्सुक्यं । उद्वेगः । इष्टवियोगात् चित्तस्याकुलीभावः । यदुक्तं,—
"स्वाभीष्टवस्त्वलाभेन चेतसो यानवस्थितिः ।
अरतिः सा तु विज्ञेया" । सुखताभावः । अस्वास्थ्यं ।
"श्रमोऽरतिर्विवर्णत्वं वैरस्यं नयनप्लवः" ।
इति सुश्रुते ।)

अरत्निः, पुं, (ऋ + कत्निः, रत्निः बद्धमुष्टिकरः, स नास्ति यस्य ।) विस्तृतकनिष्ठाङ्गुलिमुष्टिकहस्तः । कूर्परः । इति मेदिनी ॥
("एकविंशतियूपास्ते एकविंशत्यरत्नयः" ।
इति रामायणे । कफोणिः । हस्तः । करतलपार्श्वः । बद्धमुष्टिहस्तः । कील, घुसी इत्यादि भाषा ।
"यदा मूर्ध्नि महाबाहुः प्राहरत् विलपिष्यतः ।
तस्य जानु ददौ भीमो जघ्ने चैनमरत्निना" ॥
इति महाभारते ।)

अरन्धनं, क्ली, (न रन्धनं, अत्र अभावे नञ् ।) पाकाभावः । तत्तु कन्यासंक्रान्त्यां क्रतश्चेत् तदारन्धनं कथ्यते । लौरभाद्रस्य यस्मिन् कस्मिन् दिने क्रतश्चेत् इच्छारन्धनमित्युच्यते । इति लोकप्रसिद्धं । तत्र प्रमाणं ।
"कर्कान्नमद्यात् सिंहाहे सिंहान्नं सिंहकन्ययोः ।
मनसाशेषनागेभ्यो दत्त्वा सर्व्वं निशोधितं" ॥
इत्याचारमार्त्तण्डधृतवचनं ॥

अरमः, त्रि, (न रम्यतेऽत्र, आधारे घञ् ।) अवमः । अधमः । इत्यमरटीकासारसुन्दरी ॥ (नीचः । निकृष्टः । हीनः ।)

अररं, त्रि, (ऋ + अरच् ।) कवाटं । इत्यमरः ॥ करीरकोषः । आच्छादनं । इति विश्वः ॥ (पुंसि चर्म्मकर्त्तनच्छुरिकाभेदः । यज्ञाङ्गं । युद्धं । रणः ।)

अररिः, पुं, क्ली, (ऋच्छति ऋ + विच्, अरमियर्त्ति ऋ इनि ।) कपाटं । इति हेमचन्द्रः ॥

अररुः, पुं, (ऋ + अरु ।) शत्रुः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ (अस्त्रभेदः । स्वनामख्यातोऽसुरभेदः ।)

अररे, अ, (अरं शीघ्रं राति, रा + के ।) त्वरान्वितसम्बुद्धिः । शीघ्रसम्बोधनं । इति शब्दरत्नावली ॥ (शीघ्रं प्रत्युत्तरलाभेच्छया कृते अतिशयतया सम्बोधने ।
"अरे विकारसम्बोधे अररे त्वरयान्विते" ।
इति शब्दरत्नावली ।)

अरलुः, पुं, (अरं लाति, ला + कु, ऋ + अरु + रस्य ल ।) श्योनाकवृक्षः । इत्यमरः ॥ शोनागाछ इति भाषा ।

अरविन्दं, क्ली, (अराकाराणि दलानि तत्सादृश्यात् अराः, तान् विन्दति लभते इत्यर्थे विद् + श ।) पद्मं । सारसपक्षी । इत्यमरः ॥ ताम्रं । रक्तकमलं । नीलोत्पलं । इति राजनिर्घण्टः ॥ ("उन्मीलितं तूलिकयेव चित्रं सूर्य्यांशुभिर्भिन्नमिवारविन्दम्" । इति कुमारसम्भवे ।
"अरविन्दमिदं वीक्ष्य खेलत्खञ्जनमञ्जुलं ।
स्मरामि वदनं तस्याश्चारुचञ्चललोचनम्" ॥
इति साहित्यदर्पणे ।)

अरविन्दिनी, स्त्री, (अरविन्द + इनि, ङीप् ।) नलिनी । इति शब्दरत्नावली ॥ पद्मसमूहः । पद्माकरः । इति रत्नमाला ॥

अरसिकः, त्रि, (रसं वेत्ति, रस + ठन्, नञ्समासः ।) अरसज्ञः । अविदग्धः । यथा । "अरसिकेषु रसस्य निवेदनं शिरसि मा लिख मा लिख मा लिख" ॥ इत्युद्भटः ॥

अराजकः, त्रि, (नास्ति राजा यत्र सः, कप् ।) राजशून्यदेशादिः । यथा,—
"चौरप्रायं जनपदं हीनसत्त्वमराजकं" ।
इति श्रीभागवतं ॥ (नियन्तृहीनः । शासनकर्त्तृरहितः ।
"अराजके जनपदे दोषा जायन्ति वै सदा ।
उद्वृत्तं सततं लोकं राजा दण्डेन शास्ति वै" ॥
इति महाभारते ।)

अराजकः, पुं, (नास्ति राजा यत्र सः कप् ।) राजशून्यदेशादिः । यथा,—
"अराजके हि लोकेऽस्मिन् सर्व्वतो विद्रुते भयात् ।
रक्षार्थमस्य सर्व्वस्य राजानमसृजत् प्रभुः" ॥
इति मानवे ७ अध्याये ३ श्लोकः ॥

अरातिः, पुं, (न राति ददाति सुखं, रा + क्तिच्, नञ्समासः ।) शत्रुः । इत्यमरः ॥
("अरातिविक्रमालोकविकस्वरविलोचनः" ।
इति साहित्यदर्पणे ।
"अनेकयुद्धविजयी सन्धानं यस्य गच्छति ।
तत्प्रभावेन तस्याशु वशं गच्छन्त्यरातयः" ॥
इति पञ्चतन्त्रे ।)

अरालं, त्रि, (ऋ + विच्, अरमालाति, आ + ला + क ।) कुटिलं । वक्रं । इत्यमरः ॥
("अरालैः स्वाभाव्यादलिकरभकश्रीभिरलकैः" ।
इति आनन्दलहरी ।)